श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री किङ्गृहेश सुप्रभातम् ॥

## (श्री वीरराघव सुप्रभातम्)

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री किङ्गृहेश सुप्रभातम् ॥

## (श्री वीरराघव सुप्रभातम्)

कौसल्यासुप्रजा राम पूर्वा सन्ध्या प्रवर्तते।
उत्तिष्ठ नरशार्दूल कर्तव्यं दैवमाह्निकम्॥

देवि त्रयीशिखरशेखरदिव्यरूपे
श्रीशार्ङ्गुरस्स्थलनिवासनितान्ततृप्ते।
वाचामगोचरविचित्रचरित्रयुक्ते
श्री किङ्गृहेशदयिते तव सुप्रभातम्॥ 1 ॥

मातस्समस्तजगतां मधुजिन्मनोज्ञे
मानातिगामलगुणे महनीयशीले।
मारारिमुख्यमरुदानतपादपद्मे
श्री किङ्गृहेशदयिते तव सुप्रभातम्॥ 2 ॥

तापत्रयातुरजनावनजागरूके
तारस्फुरद्विविधरत्नसुधीप्रभूषे।
तत्वज्ञदेशिकहृदम्बुजनित्यवासे
श्री किङ्गृहेशदयिते तव सुप्रभातम्॥ 3 ॥

आर्द्रापराधिनि निकृष्टतमेपि जन्तौ
भूत्वा कृपार्द्रहृदया परिपासि तं त्वम्।
कान्तेन्दुबिम्बवदने कमले कलाढ्ये
श्री किङ्गृहेशदयिते तव सुप्रभातम्॥ 4 ॥

ईषत् त्वदीयकमनीयकटाक्षपातात्
प्राप्नोति जन्तुरमितां श्रियमब्जजार्थ्याम्।
हे देवि ते महिरहो सकलाभिनन्द्यः
श्री किङ्गृहेशदयिते तव सुप्रभातम्॥ 5॥

सर्वेश्वरोऽपि तव देवि कटाक्षवीक्षा -
लेशात्स्वमात्तविभवं मनुते मुरारिः।
भूमा श्रुतेरविषयस्तव केन वेद्यः
श्री किङ्गृहेशदयिते तव सुप्रभातम्॥ 6॥

हे देवदेव निगमान्तवचोविचेय -
कल्याणदिव्यगुणपूर्णकरीन्द्रबन्धो।
त्रैलोक्यसर्गपरिपालनभङ्गहेतो
श्री किङ्गृहेशभगवंस्तव सुप्रभातम्॥ 7॥

त्राणाय साधुविततेरसतां विहत्यै
गुप्त्यै च धर्मनिवहस्य सनातनस्य।
कारुण्यतः कलितवान्विविधावतारान्
त्वं किङ्गृहेशभगवंस्तव सुप्रभातम्॥ 8॥

रामावतारसमये विनिहत्य शूद्रं
शंबूकमुग्रतपसं द्विजबालगुप्त्यै।
दुर्गेचरस्तदुदितश्रमहानये किं
शेषेऽत्र किङ्गृहपते तव सुप्रभातम्॥ 9॥

श्रीधर्मसेनतनयां परिणेतुकामः
स्वीकृत्य सुन्दरवपुः परिणीय तां त्वम्।
तल्लीलया श्रमयुतो भुजगेशतल्पे
शेषेव किङ्गृहपते तव सुप्रभातम्॥ 10॥

ईशो निकृत्य विधिमस्तमघागृहीतः
तीर्थान्यटन्नपि ततो न विमुक्त अत्र।
स्नात्वा सरस्यथ निषेव्य भवन्तमस्मात्
मुक्तोऽभवद्रघुपते तव सुप्रभातम्॥ **11** ॥

ये पुष्यदर्शदिवसे निजकामिताप्त्यै
पिष्टप्रदीपपरिकल्पनतो भजन्ते।
तेषां यथेष्टमनिशं वितनोषि भद्रं
त्वं किङ्गृहेश भगवन् तव सुप्रभातम्॥ **12** ॥

भास्वानुदेति परितः किरणान्विवृण्वन्
दूरेऽपसर्पति निशोत्थतमः कदम्बः।
अम्भोरुहाणि विकसन्त्यमलानि वारि
श्री वीरराघवविभो तव सुप्रभातम्॥ **13** ॥

व्यासादिमा मुनिगणास्समुपास्य सन्ध्यां
संसेवितुं निगमबृन्दविभूषणं त्वाम्।
आयान्ति शुद्धमनसः परभक्तिनिष्ठाः
श्री वीरराघवविभो तव सुप्रभातम्॥ **14** ॥

ब्रह्मेन्द्ररुद्रधनदप्रमुखाश्च देवाः
स्त्रीभिर्निजानुगुणकिङ्करतारताभिः।
तिष्ठन्ति सेवितुमनर्घनवोपहाराः
श्री वीरराघवविभो तव सुप्रभातम्॥ **15** ॥

श्री नारदो.पि महतीं परिगृह्य हस्ते
स्वस्य प्रियेण सह तुम्बुरुणाभ्युपैति।
त्वां सौखशायनिक एति भृगुर्महर्षिः
श्री किङ्गृहेश भगवंस्तव सुप्रभातम्॥ **16** ॥

श्री शालिहोत्रमुनिराकलयन् स्वमस्ते
त्वद्धस्तपद्ममलैर्वचनैः स्तवीति।
चण्डादयश्च जयशब्दमुदीरयन्ति
श्री किङ्गृहेश्वर विभो तव सुप्रभातम्॥ **17**॥

दिव्यत्वदीयशुभविग्रहसेवनोत्कः
त्वत्सन्निधौ प्रतिवसन्निगमान्तसूरिः।
स्वोक्तां स्तुतिं तव मनस्यनुसन्दधानो
बाभाति किङ्गृहपते तव सुप्रभातम्॥ **18**॥

श्रीमानहोबिलमठाधिपतिर्यतीशः
शिष्यव्रजोक्तबिरुदावलिघोषिताशः।
सर्वस्वनिर्वहणकृत्यकृदालये ते
त्वां नन्तुमाटति विभो तव सुप्रभातम्॥ **19**॥

सौवर्णदण्डयुतचामरयुग्महस्ताः
श्रीराघवेति तव नाम मुहुर्वदन्तः।
भृत्यास्त्वदालयजकिङ्करतानियुक्ताः
तिष्ठन्ति किङ्गृहपते तव सुप्रभातम्॥ **20**॥

तुङ्गास्तुरङ्गनिवहाश्शुभलक्ष्ययुक्ताः
मत्ता मतङ्गजगणाश्च पुरो लसन्ति।
धेनुश्च सुन्दरतनुः प्रविभाति चाग्रे
श्री वीरराघवविभो तव सुप्रभातम्॥ **21**॥

हंसाश्चरन्ति वरटासहिताः प्रबुध्य
फुल्लेषु पद्मनिवहेषु बहुप्रमोदाः।
मत्ता मयूरशुककोकिलशारिकाश्च
कूजन्ति किङ्गृहपते तव सुप्रभातम्॥ **22**॥

योषा विशिष्टमणिभूषणभूषिताङ्ग्यः
    स्नात्वा महार्हवरवस्त्रधरास्सुवेषाः।
हस्तार्पितोपहृतयस्तव सद्मभागे
    तिष्ठन्ति किङ्गृहपते तव सुप्रभातम्॥ **23** ॥

इति किङ्गृहेशविषयं मनोहरं
    वरसुप्रभातमनिशं पठन्ति ये।
इह भोगजातममरेश्वरार्थितं
    कृपया भजन्ति परमं रघुप्रभोः॥ **24** ॥

॥ इति श्री किङ्गृहेश सुप्रभातं समाप्तम्॥